# संस्कृत वार्ता:

दिनाङ्क : 15/07/2026 सायम् - 06:20

<u>आदौ मुख्यवार्ता:</u>

- भारत-ब्रिटेन-देशयोः व्यापक-आर्थिक-एवम्-वाणिज्यिक-सन्धिः अद्यतन कार्यान्वितो जातः। अयं सन्धिः भारतस्य कृषकेभ्यः, उद्यमिभ्यः, सूक्ष्म-लघु-मध्यमोद्यमेभ्यश्च नवीनां गतिं प्रदास्यतीति प्रख्यातवान् प्रधानमन्त्री नरेन्द्र-मोदी।
- वाणिज्योद्योग-मन्त्री पीयूष-गोयलः आश्वसितवान् यत्, व्यापक-आर्थिक-एवम्-वाणिज्यिक-सन्ध्यन्तर्गतं दुग्ध-उत्पादनानि , शाकानि, खाद्य-तैलानि इत्याख्यानि कृषि-उत्पादनानि पूर्णरूपेण सन्ति सुरक्षितानि ।
- राष्ट्रपतिपदासीना द्रौपदीमुर्मुः समाजस्य महते कल्याणाय आयुर्वेदे आधुनिक-प्रविधीनां उपयोगाय आह्वानं व्यदधात् ।
- भारतेन संयुक्तराष्ट्र-सुरक्षा-परिषदः परिष्काराय कृतः दृढाग्रहः, सङ्केतितश्च यत् विषयेऽस्मिन् शिथिलत्वेन संयुक्तराष्ट्रे जनानां क्षीयते निरन्तरं विश्वासः ।
- अद्य तावत् ओडिशाराज्ये प्रचण्डवृष्ट्यै प्रसारिता रक्तवर्णीया सञ्चेतना।
- फिफा-विश्वचषके अद्य रात्रौ एट्लान्टा-क्रीडाङ्गणे द्वितीये उपान्त्य-चक्रीय-द्वन्द्वे अर्जेन्टीना-देशः इङ्गलैण्ड-देशेन साकं प्रतिस्पर्धिष्यति।

---

<u>प्रधानमन्त्री-सीईटीए</u>

प्रधानमन्त्री नरेन्द्रमोदी अद्य प्रावोचत् यत्, अद्यतन कार्तान्वितः व्यापक-आर्थिक-एवम्-वाणिज्यिक-सहयोगः सहैव सामाजिक-सुरक्षा-सहयोगः भारत-ब्रिटेन-देशयोः सहभागितायाः कश्चन महत्त्वपूर्ण-क्षणः वर्तते। केन्द्रीय-वाणिज्योद्योग-मन्त्रिणः पीयूष-गोयलस्य सामाजिक-सञ्जालीय-सन्देशं प्रसारयता प्रधानमन्त्रिणा इमे विचाराः प्रकटीकृताः। प्रधानमन्त्रिणा कथितं यत्, इयं सीईटीए-प्रणाली भारतस्य कृषकेभ्यः, उद्यमिभ्यः, सूक्ष्म-लघु-मध्यमोद्यमेभ्यः च नवीनां गतिं प्रदास्यति, येन नैकानि जीवन्त-क्षेत्राणि ब्रिटेन-विपण्यां दृढतां प्राप्स्यन्ति।

तेन प्रतिपादितं यत्, इदं तन्त्रं प्रौद्योगिक्याः, व्यावसायिक-सेवानां, नवोन्मेषस्य च क्षेत्रे पारस्परिक-सहयोगं प्रगाढं विधास्यति, सहैव कुशलानां भारतीय-प्रतिभानां गतिशीलतां प्रबलीकरिष्यति। अद्यैव कार्यान्विते अस्य सामाजिक-सुरक्षा-सहयोगस्य अथवा द्विगुण-अंशदान-अभिसमयस्य सन्दर्भे प्रधानमन्त्रिणा प्रोक्तं यत्, इदं ब्रिटेन-देशे अस्थायीरूपेण कार्यरतेभ्यः भारतीय-व्यावसायिकेभ्यः अमूल्यं साहाय्यं प्रदास्यति अथ च भारतीय-प्रतिष्ठानानां प्रतिस्पर्धात्मक-क्षमतां सुदृढीकरिष्यति।

अयं द्विगुण-अंशदान-अभिसमयः संयुक्त-साम्राज्ये भारतीय-व्यावसायिकानां गतिशीलतां प्रतिस्पर्धां च वर्धयिष्यति। श्रीमोदिना स्पष्टीकृतं यत्, अयं क्षणः भारत-ब्रिटेन-लोकतन्त्रयोः पारस्परिक-विश्वासं तथा च वाणिज्य-प्रौद्योगिकी-निवेश-नवोन्मेषैः सञ्चालितं भविष्योन्मुख-सहभागिता-निर्माणस्य सङ्कल्पं प्रदर्शयति। प्रधानमन्त्रिणा विशेषरूपेण समुल्लिखितं यत्, भारत-ब्रिटेन-देशौ पारस्परिक-समृद्धये निरन्तरं मिलित्वा कार्यं करिष्यतः।

---------------------------------------------

<u>राष्ट्रपति-आयुर्वेदः</u>

राष्ट्रपतिपदासीना द्रौपदीमुर्मुः समाजस्य महते कल्याणाय आयुर्वेदे आधुनिक-प्रविधीनाञ्च उपयोगाय आह्वानं कृतवती। अद्य नवदिल्ल्यां सौश्रुतम्-विंशति-षड्विंशतिः इत्याख्यस्य कार्यक्रमस्य उद्घाटन-समारोहं सम्बोधयन्ती राष्ट्रपतिः न्यगादीत् यत्, केन्द्रसर्वकारेण नवीनोर्जया सह आयुर्वेद-योगौ वैश्विक-मञ्चे संस्थापितौ। तया एतदर्थं सन्तोषः प्रकटितः यत्, आयुर्वेदिक-शल्यक्रियायाः प्राचीन-परम्परा वैज्ञानिक-मानकानुरूपं दृढीकर्तुं श्लाघनीयाः प्रयासाः विधीयन्ते।

---------------------------------------------

<u>उत्तरप्रदेश-वैष्णवः</u>

केन्द्रीयमन्त्रिमण्डलेन अद्य उत्तरप्रदेशस्य एकोनविंशति-राष्ट्रियराजमार्गात् वाराणसी-रिङ्ग्-रोड् इत्येतयोः मध्ये षड्चत्वारिंशत् किलोमीटर्-मितं यावत् व्याप्तं षट्मार्गीय-ग्रीन्-फील्ड्-एलिवेटेड्-कारिडॉर इतीदं हाईब्रिड-एनयुटी-मॉडल इत्यस्मिन् अनुमोदितम्। अद्य नवदिल्ल्यां वार्ताहरान् सम्बोधयन् सूचना-प्रसारण-मन्त्री अश्विनी-वैष्णवः अवदत् यत् परियोजनायाः आहत्य व्ययः

प्रायः सार्द्ध-चतुर्दश-सहस्र-कोटिरूप्यकात्मकः वर्तते। येन नगरीय-मार्गजालस्य सङ्कीर्णता न्यूनीभवति तथा च नगरीय-गतिशीलतायां वृद्धिः भविष्यति। अस्याः परियोजनायाः प्रभावक्षेत्रे सामान्य-यात्राकालः प्रायः षष्ठीनिमेषेभ्यः विंशति-निमेषपर्यन्तं न्यूनीभविष्यतीति अपेक्ष्यते। उत्तरप्रदेशस्य वाराणसी-नगरे जनसम्मर्दं न्यूनीकर्तुं एन्. एच्.-एकत्रिंशत् तथा वरुणा-नद्याः पार्श्वे वाराणसी-रिङ्ग्-रीड् इत्येतयोः योजयतः त्रिचत्वारिंशत् कि.मी. इत्यतः अधिकाः, षड्/चत्वारि मार्ग-युक्तस्य एलिवेटेड्-कारिडॉर इत्यस्य विकासाय अपि मन्त्रिपरिषदा अनुमोदितम्। परियोजनायाः आहत्य व्ययः प्रायः एकादशसहस्र-कोटिरूप्यकात्मकः वर्तते। इयं परियोजना एन. एच.-एकत्रिंशत् तथा काशी-रेलस्थानकयोः मध्ये यात्राकालम् प्रायः चत्वारिंशत् निमेषात् विंशति निमेषपर्यन्तं न्यूनीकरिष्यति, यच्च प्रायः पञ्चाशत् प्रतिशतं यावत् न्यूनीकरिष्यति।

श्री वैष्णवः अवदत् यत् भारतस्य सेमिकण्डक्टर्-विन्यासं तथा विनिर्माण-पर्यावरणव्यवस्थां सुदृढीकर्तुं सपादैकलक्ष-कोटिरूप्यकाणां परिव्ययेन सह मन्त्रीमण्डलेन सेमिकान् 2.0 इत्यस्य अनुमोदनं कृतम् अस्ति।

---------------------------------------------

<u>पीयूष-गोयलः</u>

केन्द्रीय-वाणिज्योद्योग-मन्त्रिणा पीयूष-गोयलेन प्रोक्तं यत् समग्रार्थिक-व्यापार-सन्धिः व्यापारस्य, निवेशस्य, नवान्वेषणस्य च नूतनान् मार्गान् उद्घाटयति। आङ्ग्ल-दैनन्दिने प्रकाशिते एकस्मिन् लेखे श्रीगोयलः अवदत् यत्, एषः सन्धिः उद्योगानां कृते अद्वितीयावसरान् स्रक्ष्यति सहैव प्रधानमन्त्रिणः नरेन्द्र-मोदिनः सप्तचत्वारिंशदधिक-द्विसहस्रेत्यस्य विकसित-भारतस्य दूरदृष्टिम् अधिक-गतिशीलां करिष्यति। अयं महत्त्वाकांक्षी- सन्धिः भारतस्य जनानां क्षमताम् आकांक्षां च प्रतिबिम्बयन् समाजस्य प्रत्येकं वर्गम् सशक्तं करिष्यतीति सः अवोचत्। अपि च, सः अधोरेखितवान् यत् न केवलं भारतीय-निर्यातकेभ्यः, अपितु सर्वकौशल-क्षेत्रेषु व्हाइट-कालर-सेवाक्षेत्रस्य कार्यकर्तृभ्यः अपि अस्य लाभः भविष्यति। श्रीगोयलः आशां प्रकटितवान् यत् पञ्चसप्ततिसहस्रतोप्यधिकाः भारतीयाः व्यावसायिकाः, नवशततोऽप्यधिकाः समवाय-विशेषाः च एतेन उपकृताः भविष्यन्ति। तेन अग्रे आश्वासितं यत् अनुबन्धः दुग्धस्य, शाकानां, सैव-फलानां,

खाद्यतैलानां, यवानां, क्षुद्र-धान्यानां सहैव संवेदनशील-कृषि-उत्पादानां संवेदनशील-सूच्यां स्थापनं विधाय तेषां रक्षणं करोति,अपि च एतेषु वस्तुषु यू. के.-देशाय किमपि शुल्क-मुक्तिं नैव प्रदास्यते।

-----------------------------------------------

<u>संयुक्तराष्ट्र-सुरक्षा-परिषद्</u>

भारतेन सङ्केतो दत्तः यत्, संयुक्तराष्ट्र-सुरक्षा-परिषदः परिष्करणे असफलतायाः सहैव वैश्विक-सङ्घर्षाणाम् प्रभावी-समाधाने विफलतायाः कारणात् संयुक्तराष्ट्रं प्रति जनानां विश्वासः निरन्तरं न्यूनः भवति। संयुक्तराष्ट्रे बहुपक्षीयतायाः भविष्योन्मुख-सज्जीकरणम् इति विषये आयोजिते मन्त्रिस्तरीय-गोलमेज़-उपवेशने सम्बोधनकाले भारतस्य स्थायि-प्रतिनिधिः पी.हरीशः अवोचत् यत्, सुरक्षा-परिषदा प्रचलत्सु सङ्घर्षेषु सार्थक-हस्तक्षेपः नैव विहितः , येन अन्ताराष्ट्रिय-शान्ति-सुरक्षयोः रक्षणाय परिषदः क्षमतायां प्रश्नाः उद्भवन्ति। तेन प्रतिपादितं यत्, इयं अशीतिवर्ष-पुरातनी संयुक्तराष्ट्र-संरचना वर्तमानकालस्य वैश्विक-आह्वानानि सम्मुखीकर्तुं पर्याप्ता नास्ति।

-----------------------------------------------

<u>भारतर्तु-विभाग:</u>

भारतर्तु-विभागेन अद्य ओडिशा-राज्ये अत्यधिक- वृष्ट्यै रक्तवर्णीया पूर्वसञ्चेतना प्रदत्ता , सहैव पृथक् पृथक् स्थानेषु अत्यधिक-वृष्टेः सम्भावनाSपि प्रकटिता। श्वः यावत् पूर्वोत्तरभारतस्य, बिहारस्य, पश्चिमबङ्गस्य, उत्तराखण्डस्य च केषुचित् भागेषु अपि प्रचण्डवृष्टिः भवितुम् अर्हति। एतदतिरिच्य, तमिलनाडु, पुदुचेरी, करैकल इत्येतेषु प्रदेशेषु दिने उष्णतरङ्गस्य स्थितिः आशास्यते। ऋतुविभागस्य अनुसारं श्वः यावत् दिल्ली, हरियाणा, चण्डीगढ, पञ्जाब, रायलसीमा, उत्तरप्रदेश- इत्येतेषु उष्ण-आर्द्र-ऋतोः सम्भावना विद्यते। अत्रान्तरे, बिहार-राज्ये नेपालस्य जलग्रहणक्षेत्रे प्रचण्डवृष्ट्या गण्डक-बागमती-कमला-बालन-कोसी-नदीनां जलस्तरं

निरन्तरं वर्धमानः अस्ति। गोपालगञ्ज-नगरे गण्डक-नदिः शून्य-द्वि सेण्टिमीटर-मितं यावत् सङ्कट-चिह्नं अत्यक्रामत्।

-----------------------------------------------

<u>फ़ीफ़ा-विश्वकप-फ़ुट्बाल्</u>

फ़ीफ़ा-विश्वकप-फ़ुट्बाल्-क्रीडायां, गतविजेता-अर्जेण्टीना-देशः अद्य रात्रौ अमेरिकादेशस्य अटलाण्टा-क्रीडाङ्गणे द्वितीयायाम् उपान्त्यचक्रीय-क्रीडायां इङ्ग्लैण्ड्-देशं सम्मुखीकरिष्यति। क्रीडायाः आरम्भः भारतीयसमयानुसारं प्रातः सार्द्ध-द्वादशवादने भविष्यति।

।। इति वार्ता: ।।